प्रमोद शर्मा

सायं प्रात: प्रार्थनाएं

सरस्वती श्रुतिमहती महीयताम्

ॐ

श्री सरस्वती संस्कृत महाविद्यालय

खन्ना (पंजाब)

मूल्य ३रू०

सरस्वती श्रुतिमहती महीयताम्

खन्नास्थ-श्रीसरस्वती-संस्कृत-महाविद्यालय

में छात्रों के लिए

प्रातः-सायं-नियत प्रार्थनाएँ

केवल प्रातः-प्रार्थना

प्रात;स्मरण :—

प्रातर्भजामि मनसो, वचसामगम्यम्,
वाचो विभान्ति निखिला यदनुग्रहेण ।
यन्नेति नेति वचनैर्निगमा अवोचु-
स्तं देवदेवमजमच्युतमाहुरग्रयम् ॥ १ ॥

पृथिवी-वन्दना ;—

समुद्रवसने देवि पर्वतस्तनममण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ २ ॥

गुरु-वन्दना :—

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरु; साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नम; ॥ ३ ॥

गोपाल-ध्यानम् ;—

बर्हापीडं नटवरवपु : कर्णयो; कर्णिकारम्,
बिभ्रद्वास; कनक-कपिशं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधर-सुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्ति. ॥ ४ ॥

शरणागति :—

करचरण-कृतं-वाक्-कायजं कर्मजं वा
श्रवण-नयनजं वा मानसं वाऽपराधम्।
विदितमविदितं वा सर्वमेतत् क्षमस्व,
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥५॥

त्वमेकं शरण्यं त्वमेकं वरेण्यम्,
त्वमेकं जगत्पालकं स्वप्रकाशम्।
त्वमेकं जगत्कर्तृ पातृ प्रहर्तृ,
त्वमेकं परं निश्चलं निर्विकल्पम् ॥६॥

वयं त्वां स्मरामो वयं त्वां भजामो,
वयं त्वां जगत्साक्षिरूपं नमामः।
सदेकं निधानं निरालम्बमीशम्,
भवाम्भोधिपोतं शरण्यं व्रजामः ॥७॥

केवल सायं-प्रार्थना

श्री अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधी: किं प्रभाषेत किमासीत व्रजेत किम् ॥ १ ॥

श्री भगवानुवाच—

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥२॥
दु:खेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतराग-भय-क्रोधः स्थितधीर्मुनिरुच्यते ॥३॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥४॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५॥

विषया विनिवर्तन्ते निराहारस्य देहिन ; ।
रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥६॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चित : ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥७॥

तानि सर्वाणि संयम्य युक्त आसीत मत्पर : ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥८॥

ध्यायतो विषयान् पुंस; संगस्तेषूपजायते ।
संगात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥९॥

क्रोधात् भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥१०॥

राग-द्वेष-वियुक्तैस्तु विषानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥११॥

प्रसादे सर्वदुःखानां हानिरस्योपजयते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥१२॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयनः शान्तिरशान्तस्य कुत; सुखम् ॥१३॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥१४॥

तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥१५॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी :
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥१६॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥१७॥

विहाय कामान् यः सर्वान् पुमांश्चरति निस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥१८॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥११॥

उभयत्र (प्रातः-सायं) प्रार्थना

ऊँ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥१॥

ऊँ भद्रं कर्णेभि; श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवां-सस्तनूभिर्व्यशेम देवहितं यदायुः ॥२॥

ऊँ ईशावास्यमिदं-सर्वं यत्किञ्चिज्-जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् - धनम् ॥३॥
तेन

ॐ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥५॥

ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये ।
शंयोरभिस्त्रवन्तु नः ॥५॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ॥६॥

या कुन्देन्दु-तुषार-हार-धवला या शुभ्र-वस्त्रावृता
या वीणावरदण्ड-मण्डितकरा या श्वेत-पद्मासना ।
या ब्रह्माच्युत-शङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेष-जाड्यापहा ॥७॥

स्वस्ति प्रजाभ्यः परिपालयन्ताम्
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यम्
लोकाः समस्ताः सुखिनो भवन्तु ॥८॥

यं ब्रह्मा वरुणेन्द्र-रुद्र-मरुतः स्तुन्वन्ति दिव्यैस्तवै
र्वेदैः साङ्गपद-क्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थित-तद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुराऽसुरगणा देवाय तस्मै नमः ॥९॥

(वैदिक राष्ट्रगीत)

ऊँ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् ।
आ राष्ट्रे राजन्य: शूर इषव्योऽतिव्याधी महारथो जायताम् ।
दोग्ध्री धेनुर्वोढानड्वानाशु: सप्ति: पुरन्धिर्योषा
जिष्णू रथेष्ठा: सभेयो युवास्य यजमानस्य वीरो जायताम् ॥

निकामे निकामे न: पर्जन्यो वर्षतु
फलवत्यो न ओषधय: पच्यन्ताम् ।
योगक्षेमों न: कल्पताम् ॥१०॥

न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दु:खतप्तानां प्राणिनामार्तिनाशनम् ॥११॥

ऊँ असतो मा सद् गमय ।
ऊँ तमसो मा ज्योतिर्गमय ।
ऊँ मृत्योर्मा अमृतं गमय ॥१२॥

सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया: ।
सर्वे भद्रानि पश्यन्तु मा कश्चिद् दु:खमाप्नुयात् ॥१६॥

ओं पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥१४॥

ऊँ शान्ति: शान्ति: शान्ति: ।

अथ स्वस्ति-प्रार्थना

हरिः ओ३म्

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्ठनेमिः स्वस्ति नो वृहस्पतिर्दधातु ॥

पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि ।
विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥

अग्निदेवता वातो देवता सूर्यो देवता चन्द्रमा देवता ।
वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता
विश्वेद्देवा देवता वृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥

द्यौः शान्तिरन्तरिक्ष गूं शान्तिः, पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्म शान्तिः,सर्व गूं शान्तिः शान्तिरेव शान्तिः,सा मा
शान्तिरेधि ॥

~~विश्वानि~~ देव सवितर्दुरितानि परासुव ।
विश्वानि
यद् भद्रं तन्न आसुव ॥

इमा रुद्राय तबसे कपर्दिने क्षयद्-
वीराय प्रभरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे
विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे,
तेन यज्ञमव तेन यज्ञपति तेन मामव ॥

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं
तनोत्वरिष्टं यज्ञ गूं समिमं दधातु ।।

विश्वे देवास इह मादयन्तामों३ प्रतिष्ठ, एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्व मेव प्रतिष्ठितं भवति ।।

गणानां त्वा गणपति गूं हवामहे,प्रियाणां त्वा प्रियपति गूं हवामहे, निधीनां त्वा निधिपति गूं हवामहे, वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधम् ।।

नमो गणेभ्यो गंणपतिभ्यश्च वो नमो, नमो व्रातेभ्यो व्रात पतिभ्यश्च वो नमो, नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरुपेभ्यो विश्वरूपेभ्यश्च वो नमः ।।

।। हरिः ओम् ।।